CAREERINDIA

**Code No. 09**

Total No. of Questions : 46 ]

Total No. of Printed Pages : 7 ]

**March, 2010**

# SANSKRIT

Time : 3 Hours 15 Minutes ] [ Max. Marks : 100

www.careerindia.com

I. एतेषां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत — 10 × 1 = 10

1) 'आर्य' इति कस्य कुलस्य आलापः ?

2) सुमन्त्रः कः ?

3) गुरुवचनं केन न अतिक्रान्तपूर्वम् ?

4) नगराणि कथं प्रवेष्टव्यानि ?

5) वसुभूतिः कः ?

6) ऐन्द्रजालिकस्य नाम किम् ?

7) वत्सराजस्य विश्वासस्थानं कः ?

8) कुन्ती केन पालिता ?

9) कुरुपाण्डवानां वंशः कः ?

10) कः क्षत्रियाणां धर्मः ?

[ Turn over

CAREERINDIA



II. एतेषु **त्रयाणां** भाषान्तरं कृत्वा भावं विशदयत — 3 × 4 = 12

11) इदं गृहं तत्प्रतिमानृपस्य नः
समुच्छ्रयो यस्य स हर्म्यदुर्लभः ।
अयन्त्रितैरप्रतिहारिकागतै-
र्विना प्रणामं पथिकैरुपास्यते ॥

12) प्राणाः परित्यजत काममदक्षिणं मां
रे दक्षिण भवत मद्वचनं कुरुध्वम् ।
शीघ्रं न यात यदि तन्मुषिताः स्य नूनं
याता सुदूरमधुना गजगामिनी सा ॥

13) विरम विरम वह्ने मुञ्च धूमानुबन्धं
प्रकटयसि किमुच्चैरर्चिषां चक्रवालम् ।
विरहहुतभुजाऽहं यो न दग्धः प्रियायाः
प्रलयदहनभासा तस्य किं त्वं करोषि ॥

14) अवाच्यं वाच्यं वा किमिव चरतां भैक्षमनिशं
प्रहारं हारं वा खर इह समानं गणयति ।
धनुः सज्यं त्यक्त्वा दधति यदिमे पाण्डुतनयाः
कपालं तच्चित्रं दलति न हि तेऽद्यापि हृदयम् ॥

15) भीमस्य शत्रुगणमर्दनगर्धनस्य
सिंहस्य मत्तगजपाटनलम्पटस्य ।
किं मूढ शस्त्रकथया ननु वज्रकल्पः
त्वन्मस्तकास्थिभिदुरोऽस्ति ममैष मुष्टिः ॥

www.careerindia.com

CAREERINDIA



III. अ) **एकस्य** उत्तरं संस्कृतभाषायां, प्रादेशिकभाषायाम् , आंग्लभाषायां वा प्रबन्धरूपेण लिखत —

1 × 8 = 8

16) भासरूपकाणां साम्याशा: के के ?

17) यौगन्धरायणेन विहितान् उपायान् तेषां परिणामं च विवृणुत ।

आ) **द्वयोरेव** लघुटिप्पण्यौ संस्कृतभाषायां, प्रादेशिकभाषायां , आंग्लभाषायां वा लिखत —

2 × 4 = 8

18) भरतस्य भ्रातृप्रेम

19) सागरिका

20) युधिष्ठिर:

21) नान्दी ।

IV. **चतुर्णां** सन्दर्भं संस्कृतभाषायां सूचयत — 4 × 3 = 12

22) पिपासार्तोऽनुधावामि क्षीणतोयं नदीमिव ।

23) गङ्गायमुनयोर्मध्ये कुनदीव प्रवेशिता ।

24) मा सन्देहं कुरु इन्द्रजालमेवेदम् ।

25) दुरवगाहा गतिर्दैवस्य ।

26) नहि खरदंष्टो मृगाधिप: सहायमपेक्षते ।

27) न खल्वेकचक्रो रथो गच्छति ।

V. अ) **एकस्य** उत्तरं प्रादेशिकभाषायाम् , आंग्लभाषायां वा प्रबन्धरूपेण लिखत — 1 × 10 = 10

28) 'श्रेये लक्ष्मी: प्रतिष्ठिता' इति पाठस्य सारांशं लिखत ।

29) जम्बुक: मानवजन्मन: श्रेष्ठत्वं कथं प्रतिपादयति ?

[ Turn over

www.careerindia.com

CAREERINDIA



आ) **द्वयोः** लघुटिप्पण्यौ प्रादेशिकभाषायाम् , आङ्ग्लभाषायां वा लिखत —

2 × 5 = 10

30) नायनः

31) दुष्टबुद्धिः

32) कुलिन्दकः

33) मौलिक–मङ्गुलीयकम् ।

VI. **पञ्चानां** उपप्रश्नानां उत्तराणि संस्कृतभाषायां लिखत — 5 × 2 = 10

34) **द्वयोः** सन्धिं विभज्य सन्धिनाम लिखत —

मयापि, ततश्च, वेषेणैव, पितेव ।

35) **द्वयोः** लिङ्ग विभक्ति वचनानि लिखत —

आर्यस्य, आशां, भवनम् , भ्रातरः ।

36) **द्वयोः** लकार पुरुष वचनानि लिखत —

करोतु , अस्ति, धारयिष्यसि, अवदन् ।

37) **द्वयोः** विग्रहवाक्यं लिखत —

वत्सराजः, गोपहीनाः, तपोधनः, अनुत्तरा ।

38) **द्वयोः** व्याकरणरीत्या पदपरिचयं कुरुत —

रोदितुम् , पतन् , गतः, स्मृत्वा ।

39) प्रयोग परिवर्तनं कुरुत —

अहं यास्यामि

**अथवा**

भरतेन प्रतिमागृहं प्रविष्टम् ।

www.careerindia.com

CAREERINDIA



40) व्याकरण दोषां परिहृत्य लिखत —

i) भवान् गच्छ

ii) धिक् संसारणे ।

41) अत्रत्यमलङ्कारं सलक्षणं निर्दिशत —

दुर्जनैरभिभूषितैषा कुन्तीव परिशोचति ।

VII. 42) संस्कृतभाषायां अनुवदत — 5

ಒಮ್ಮೆ ಸಗರನೆಂಬ ರಾಜನಿದ್ದನು. ಅವನು ಅಶ್ವಮೇಧ ಯಜ್ಞವನ್ನು ಮಾಡಲು ಯೋಚಿಸಿ ಯಜ್ಞದ ಕುದುರೆಯನ್ನು ಬಿಟ್ಟನು. ಇಂದ್ರನು ಇದನ್ನು ತಿಳಿದು ಸಗರನ ಯಜ್ಞದ ಕುದುರೆಯನ್ನು ಅಪಹರಿಸಿ ಪಾತಾಳ ಲೋಕಕ್ಕೆ ರಹಸ್ಯವಾಗಿ ತೆಗೆದುಕೊಂಡು ಹೋಗಿ ಕಪಿಲ ಮಹರ್ಷಿಯ ಹಿಂದೆ ಅಡಗಿಸಿ ಇಟ್ಟನು. ಸಗರನ ಮಕ್ಕಳು ಯಜ್ಞದ ಕುದುರೆಗಾಗಿ ಹುಡುಕಿದರು. ಎಲ್ಲೂ ಕಾಣದಾಗಲು ಭೂಮಿಯನ್ನು ಅಗೆಯುತ್ತ ಪಾತಾಳ ಲೋಕಕ್ಕೆ ಹೋದರು. ಅಲ್ಲಿ ಕಪಿಲ ಮಹರ್ಷಿಯ ಹಿಂದೆ ಮೇಯುತ್ತಿರುವ ಯಜ್ಞದ ಕುದುರೆಯನ್ನು ನೋಡಿದರು. ಕಪಿಲ ಮಹರ್ಷಿಯೇ ಕಳ್ಳನೆಂದು ತಿಳಿದು ಹಿಂಸಿಸಿದರು. ಕಪಿಲ ಮಹರ್ಷಿಯು ಕೋಪದಿಂದ ಕಣ್ಣು ತೆರೆಯಲು ಸಗರನ ಮಕ್ಕಳು ಸುಟ್ಟು ಭಸ್ಮವಾದರು.

Once there was a king called Sagar. Intending to perform Ashwamedha Yajna he let loose the consecrated horse. Indra knowing this, stole the horse and led it to the netherworld and left it behind sage Kapila. The children of Sagar searching for the horse and not finding it went to the netherworld after digging the earth. Seeing the horse grazing behind sage Kapila, they tortured the sage thinking him to be the thief. The sons of Sagar were burnt to ashes when the sage opened his eyes with anger.

[ Turn over

www.careerindia.com

CAREERINDIA



43) परिच्छेदमिमं पठित्वा प्रश्नानामुत्तराणि लिखत — 5 × 1 = 5

पुरा धारानगरे भोजनाम संस्कृतभाषाप्रियः भूपतिः आसीत् । तस्य आस्थाने बहवः विद्वांसः, कवयः च अवर्तन्त । भोजः स्वयं पण्डितः काव्यज्ञः कविः च आसीत् । चम्पूरामायणम् नाम मनोज्ञं काव्यं तेनैव प्रणीतम् । सः राजा कवीन् विशेषेण पुरस्कृत्य तेभ्यः पुष्कलं धनं प्रयच्छतीति कीर्तिः सर्वत्र प्रसृतासीत् । तस्य सभायां कालिदासादयः बहवः कवयः व्यराजन्त । नरपतिं कविताप्रियं ज्ञात्वा केचित् छान्दसाः धारानगरम् आगच्छन् । ते वैदिकाः नगरस्य भुवनेश्वरी मन्दिरम् गत्वा कवितां कर्तुमुपविष्टाः । तस्मिन् समये कालिदासः देवता दर्शनाय देवतामन्दिरम् आगतः ।

i) भोजः कुत्र भूपतिः आसीत् ?

ii) चम्पूरामायणं कीदृशं काव्यम् ?

iii) राज्ञः आस्थाने के अवर्तन्त ?

iv) छान्दसाः किमर्थम् धारानगरं आगच्छन् ?

v) वैदिकाः कुत्र उपविष्टाः ?

**अथवा**

संस्कृत पुस्तकप्रेषणाय आवेदनं कृत्वा मित्रं प्रति पत्रमेकं लिखत ।

44) अस्य श्लोकस्य अन्वयं लिखत — 3

यस्तु सञ्चरते देशान् यस्तु सेवेत पण्डितान्
तस्य विस्तारिता बुद्धिः तैलबिन्दुरिवाम्भसा ॥

45) यथानिर्देशं कुरुत — ( **त्रयाणामेव** ) 3 × 1 = 3

i) वन + ………………… वनौषधं । ( रिक्तस्थानं पूरयत )

ii) यत्र–तत्र, यथा ………………… । (नित्यसम्बंधिपदम् )

iii) …………… पठतः ………………… । ( इतरवचने )

iv) एकचक्रम् ………………… । ( कवेः नाम )।

www.careerindia.com

CAREERINDIA



46) परिच्छेदमिमं पठित्वा आवरणस्थानि पदानि चित्वा परिच्छेदं पूरयत — $8 \times \frac{1}{2} = 4$

कश्चित् ………………… रात्रौ विपणिमार्गेण गच्छतिस्म । सः ………………… दण्डमधारयत् । वामहस्ते च ………………… एकम् अवहत् । तस्य पुरः कश्चित् ………………… कुमारः अभ्यगच्छत् । कुमारः अन्धं ……………………… चेष्टां कर्तुं …………………………… । अतः ………………… । कस्मात् त्वं अन्धः सन् दीपं वहसि किमनेन ते ………………… इति ।

( ऐच्छत् , दक्षिणहस्ते, अन्धः, कुटिलमतिः, दृष्ट्वा, प्रदीपम् , प्रयोजनम् , अपृच्छत् )

www.careerindia.com